योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ०३

तृतीयः सर्गः ३

श्रीवाल्मीकिरुवाच ।

तस्यैवंप्रायया तत्र ततयोदारचिन्तया ।

सा व्यतीयाय रजनी पद्मस्येवार्ककाङ्क्षिणः ।। १

किंचित्तमःकडारासु किंचिदप्यरुणासु च ।

नभोविरलतारासु दिक्षु संमार्जितास्विव ।। २

प्रभाततूर्यघोषेण सममिन्दुसमाननः ।

उत्तस्थौ राघवः श्रीमान्पद्मः पद्मकरादिव ।। ३

प्रातःस्नानविधिं कृत्वा संपाद्य भ्रातृभिः पुनः ।

प्रहिताल्पपरीवारो वसिष्ठसदनं ययौ ।। ४

समाधिसंस्थमेकान्ते मुनिमात्मपरायणम् ।

दूर एवाननामासौ रामो विनतकन्धरः ।। ५

तं प्रणम्याङ्गणे तस्थुस्तस्मिंस्ते विनयान्विताः ।

यावत्तमः समालूनं व्यक्तं दिङ्मुखमण्डलम् ।। ६

राजानो राजपुत्राश्च ऋषयो ब्राह्मणास्ततः ।

आययुः सदनं मौनं ब्रह्मलोकमिवामराः ।। ७

तद्वसिष्ठस्य सदनं बभूव जनसंकुलम् ।

हस्त्यश्वरथसंबाधं पार्थिवाचारशोभनम् ।। ८

क्षणाद्वसिष्ठो भगवान्विरराम समाधितः ।

आचारेणोपचारेण जग्राह प्रणतं जनम् ।। ९

तथानुयातो मुनिभिर्विश्वामित्रान्वितो मुनिः ।

आरुरोह रथं श्रीमान्सहसाब्जमिवाब्जजः ।। १०

ययौ गृहं दाशरथं सैन्येन महता वृतः ।

ब्रह्मेव शक्रनगरं समस्तसुरमालितः ।। ११

विवेशावनतां तत्र रम्यां दाशरथीं सभाम् ।

हंसयूथानुवलितो राजहंस इवाब्जिनीम् ।। १२

त्रीणि तत्र पदान्याशु तदा दशरथो नृपः ।

निर्जगाम महावीरः सिंहासनसमुत्थितः ।। १३

विविशुस्तत्र ते सर्वे नृपा दशरथादयः ।

वसिष्ठाद्याश्च मुनयो ऋषयो ब्राह्मणास्तथा ।। १४

मन्त्रिणश्च सुमन्त्राद्याः सौम्याद्याश्च विपश्चितः ।

राजपुत्राश्च रामाद्या मन्त्रिपुत्राः शुभादयः ।। १५

अमात्याद्याः प्रकृतयः सुहोत्राद्याश्च नागराः ।

मालवाद्यास्तथा भृत्याः पौराद्याश्चैव मालिनः ।। १६

अथ तेषूपविष्टेषु स्वेषु स्वेष्वासनेषु च ।

सर्वेष्वेवोपविष्टेषु वसिष्ठोन्मुखदृष्टिषु ।। १७

सभाकलकले शान्ते मौनसंस्थेषु बन्दिषु ।

वृत्तासु स्थितिवार्तासु सौम्ये तस्मिन्सभान्तरे ।। १८

स्फुरत्पवनमालासु विशत्स्वम्भोजकोटरात् ।

परागेषु विलोलेषु मुक्तादामसु चञ्चलम् ।। १९

बृहत्कुसुमदोलाभ्यः प्रसृताभ्यः समंततः ।

वाति मांसलमामोदमादाय मधुरानिले ।। २०

वातायनेषु मृदुषु कुसुमाकीर्णभूमिषु ।

पर्यङ्केषूपविष्टासु पश्यन्तीषु पुरंध्रिषु ।। २१

जालागतार्ककरलोलविलोचनासु रत्नप्रभानिकरपिङ्गलकोमलासु ।

संत्यक्तचापललवं चपलासु तासु मौनस्थितासु सितचामरधारिणीषु ।। २२

मुक्ताफलप्रतिफलप्रतिमार्करश्मिरागोदरास्वजिरभूमिषु पुष्पकौघम् ।

नासादयत्यभिनवातपबिम्बबुद्ध्या भ्रान्ते भ्रमत्यलिकुले नभसीव मेघे ।। २३

पुण्यैर्वसिष्ठवदनप्रसृतं श्रुतं य-त्तत्संततिप्रसृतविस्मयमार्यलोके ।

सत्संगमे मृदुपदाक्षरमुग्धवाक्य-मन्योन्यमीप्सितमनल्पगुणाभिरामम् ।। २४

दिग्भ्यः पुराच्च गगनाच्च वनाच्च सिद्ध-विद्याधरार्यमुनिविप्रगणे वसिष्ठम् ।

मौनप्रप्राणमभितः प्रविशत्यशब्दं सोपांशु गौरववता सह जातवाक्ये ।। २५

उन्निद्रकोकनदकोमलकोशकृष्ट-मग्नालिजालमकरन्दसुवर्णरागैः ।

आपिङ्गले मरुति वाति विलोलघण्टा-टांकारगीतविनिपीतनिशान्तगीते ।। २६

अगुरुतगरधूमे चन्दनामोदमिश्रे सरसकुसुमदामोद्दामगन्धाङ्किताभ्रे ।

सरति सति वितानाम्भोरुहामोदलेशै-श्चलकुसुमरजोङ्के शब्दविज्ञातभृङ्गम् ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षोपायेषूपशमप्रकरणे सभासंस्थानवर्णनं नाम तृतीयः सर्गः ।। ३ ।।